# શ્રીવિષ્ણુસ્તુતિઃ (મુચુકુન્દકૃતા)

shrIviShNustutiH (muchukundakRRitA)

sanskritdocuments.org

May 12, 2018

# shrIviShNustutiH (muchukundakRRitA)

# શ્રીવિષ્ણુસ્તુતિઃ (મુચુકુન્દકૃતા)

## Sanskrit Document Information

Text title : viShNustutiHmuchukunda

File name : viShNustutiHmuchukunda.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 12, 2018

*sanskritdocuments.org*

# શ્રીવિષ્ણુસ્તુતિઃ (મુચુકુન્દકૃતા)

વિમોહિતોઽયં જન ઈશ માયયા
    ત્વદીયયા ત્વાં ચ ભજત્યનર્થદૃક્ ।
સુખાય દુઃખપ્રભવેષુ સજ્જતે
    ગૃહેષુ યોષિત્પુરુષશ્ચ વઞ્ચિતઃ ॥ ૧॥

લબ્ધ્વા જનો દુર્લભમત્ર માનુષં
    કથઞ્ચિદવ્યઙ્ગમયત્નતોઽનઘ ।
પાદારવિન્દં ન ભજત્યસન્મતિ-
    ર્ગૃહાન્ધકૂપે પતિતો યથા પશુઃ ॥ ૨॥

મમૈષ કાલોઽજિત નિષ્ફલો ગતો
    રાજ્યશ્રિયોન્નદ્ધમદસ્ય ભૂપતે ।
મર્ત્યાત્મબુદ્ધેઃ સુતદારકોશભૂ-
    ષ્વાસજ્જમાનસ્ય દુરન્તચિન્તયા ॥ ૩॥

કલેવરેઽસ્મિન્ ઘટકુડ્યસન્નિભે
    નિરૂઢમાનો નરદેવ ઇત્યહમ્ ।
વૃતો રથેભાશ્વપદાત્યનીકપૈર્ગાં
    પર્યટંસ્ત્વાગણયન્ સુદુર્મદઃ ॥ ૪॥

પ્રમત્તમુચ્ચૈરિતિ કૃત્યચિન્તયા
    પ્રવૃદ્ધલોભં વિષયેષુ લાલસમ્ ।
ત્વમપ્રમત્તઃ સહસાઽભિપદ્યસે
    ક્ષુલ્લેલિહાનોઽહિરિવાખુમન્તકઃ ॥ ૫॥

પુરા રથૈર્હેમપરિષ્કૃતૈશ્ચરન્
    મતઙ્ગજૈર્વા નરદેવસંજ્ઞિતઃ ।
સ એવ કાલેન દુરત્યયેન તે
    કલેવરો વિટ્કૃમિભસ્મસંજ્ઞિતઃ ॥ ૬॥

નિર્જિત્ય દિક્ચક્રમભૂતવિગ્રહો
    વરાસનસ્થઃ સમરાજવન્દિતઃ ।
ગૃહેષુ મૈથુન્યસુખેષુ યોષિતાં
    ક્રીડામૃગ પૂરુષ ઈશ નીયતે ॥ ૭॥

કરોતિ કર્માણિ તપઃસુ નિષ્ઠિતો
    નિવૃત્તભોગસ્તદપેક્ષયા દદત્ ।
પુનશ્ચ ભૂયેયમહં સ્વરાડિતિ
    પ્રબુદ્ધતર્ષો ન સુખાય કલ્પતે ॥ ૮॥

ભવાપવર્ગો ભ્રમતો યદા ભવે-
    જ્જનસ્ય તર્હ્યચ્યુત સત્સમાગમઃ ।
સત્સઙ્ગમો યર્હિ તદૈવ સદ્ગતૌ
    પરાવરેશે ત્વયિ જાયતે મતિઃ ॥ ૯॥

મન્યે મમાનુગ્રહ ઈશ તે કૃતો
    રાજ્યાનુબન્ધાપગમો યદૃચ્છયા ।
યઃ પ્રાર્થ્યતે સાધુભિરેકચર્યયા
    વનં વિવિક્ષદ્ભિરખણ્ડભૂમિપૈઃ ॥ ૧૦॥

ન કામયેઽન્યં તવ પાદસેવનાદ્-
    અકિઞ્ચનપ્રાર્થ્યતમાદ્વરં વિભો ।
આરાધ્ય કસ્ત્વાં હ્યપવર્ગદં હરે
    વૃણીત આર્યો વરમાત્મબન્ધનમ્ ॥ ૧૧॥

તસ્માદ્વિસૃજ્યાશિષ ઈશ સર્વતો
    રજસ્તમઃસત્ત્વગુણાનુબન્ધનાઃ ।
નિરઞ્જનં નિર્ગુણમદ્વયં પરં
    ત્વાં જ્ઞપ્તિમાત્રં પુરુષં વ્રજામ્યહમ્ ॥ ૧૨॥

ચિરમિહ વૃજિનાર્તસ્તપ્યમાનોઽનુતાપૈઃ
અવિતૃષષડમિત્રો લબ્ધશાન્તિઃ કથઞ્ચિત્ ।
શરણદ સમુપેતસ્ત્વત્પદાબ્જં પરાત્મન્
અભયમમૃતમશોકં પાહિ માઽઽપન્નમીશ ॥ ૧૩॥

ઇતિ શ્રીમદ્ભાગવતાન્તર્ગતા મુચુકુન્દકૃતા શ્રીવિષ્ણુસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIviShNustutiH (muchukundakRRitA)*

pdf was typeset on May 12, 2018

Please send corrections to *sanskrit@cheerful.com*